योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ००६

षष्ठः सर्गः ६

विद्याधर उवाच ।

यदुदारमनायासं क्षयातिशयवर्जितम् ।

पदं पावनमाद्यन्तरहितं तद्वदाशु मे ।। १

एतावन्तमहं कालं सुप्त आसं जडात्मकः ।

इदानीं संप्रबुद्धोऽस्मि प्रसादादात्मनो मुने ।। २

मनो महामयोत्तप्तं क्षुब्धमज्ञानवृत्तिषु ।

मामुद्धर दुरन्तेहं मोहादहमिति स्थितात् ।। ३

श्रीमत्यपि पतन्त्याशु शातनाः कातरादयः ।

गुणवत्युग्रपत्रेऽपि तुहिनानीव पङ्कजे ।। ४

जायन्ते च म्रियन्ते च केवलं जीर्णजन्तवः ।

न धर्माय न मोक्षाय मशका इव पङ्कजे ।। ५

भावैस्तैरेव तैरेव तुच्छालम्भविडम्बनैः ।

चिरेण परिखिन्नाः स्मो विप्रलम्भाः पुनः पुनः ।। ६

नान्तोऽस्त्यस्य न च स्थैर्यावस्थाऽविश्रान्तमानसम् ।

भ्रमतो भोगभङ्गेषु मरुभूमिष्विवाध्वनः ।। ७

आपातमधुरारम्भा भङ्गुरा भवहेतवः ।

अचिरेण विकारिण्यो भीषणा भोगभूमयः ।। ८

मानावमानपरया दुरहंकारकान्तया ।

न रमे वामया तात हतविद्याधरश्रिया ।। ९

दृष्टाश्चैत्ररथोद्यानभुवः कुसुमकोमलाः ।

कल्पवृक्षलतादत्तसमस्तविभवश्रियः ।। 6.2.6.१०

विहृतं मेरुकुञ्जेषु विद्याधरपुरेषु च ।

विमानवरमालासु वातस्कन्धस्थलीषु च ।। ११

विश्रान्तं सुरसेनासु कान्ताभुजलतासु च ।

हारिहारविलासासु लोकपालपुरीषु च ।। १२

न किंचिदुचितं साधु सर्वमाधिविषोष्मणा ।

दग्धं भस्मायते तात विज्ञातमधुना मया ।। १३

रूपालोकनलोलेन वनिताननगृध्नुना ।

सावभासेन दोषाय दुःखं नीतोस्मि चक्षुषा ।। १४

इदं गुणावहं नेदमिति मुक्त्वा विकल्पनम् ।

रूपमात्रानुसारित्वादवस्तुन्यपि धावति ।। १५

तावदायाति विरतिं न वशं यावदापदाम् ।

नानाबन्धपरं चेतः परानर्थेहितोन्मुखम् ।। १६

घ्राणमेतदनर्थाय धावच्चैवामितः स्फुटम् ।

न निवारयितुं तात शक्नोमीह हयं यथा ।। १७

गन्धोदकप्रणालेन मुखश्वासानुपातिना ।

वैरिणेवातिदोषेण घ्राणेनास्मि नियोजितः ।। १८

चिरं रसनया चाहमनया नयहीनया ।

गजगोमायुगुप्तेषु दुःखाद्रिष्वलमाहतः ।। १९

निरोद्धुं न च शक्नोमि स्पर्शलम्पटतां त्वचः ।

ग्रीष्मकालसमिद्धस्य तापमंशुमतो यथा ।। 6.2.6.२०

शुभशव्दरसार्थिन्यो मुनेः श्रवणशक्तयः ।

मां योजयन्ति विषमे तृणेच्छा हरिणं यथा ।। २१

प्रणताः प्रियकारिण्यः प्रह्वभृत्यसमीरिताः ।

वाद्यगेयरवोन्मिश्राः शुभशब्दश्रियः श्रुताः ।। २२

श्रियः स्त्रियो दिशश्चैव तटाश्चाम्भोधिभूभृताम् ।

दृष्टा विभवहारिण्यः प्रक्वणन्मणिभूषणाः ।। २३

चिरमास्वादिताः स्वादु चमत्कारमनोरमाः ।

प्रह्वकान्ताजनानीताः षड्रसा गुणशालिनः ।। २४

कौशेयकामिनीहारकुसुमास्तरणानिलाः ।

निर्विघ्नमभितः स्पृष्टा भृशमाभोगभूमिषु ।। २५

वधूमुखौषधीपुष्पसमालम्भनभूमयः ।

अनुभूता मुने गन्धा मन्दानिलसमीरिताः ।। २६

श्रुतं स्पृष्टं तथा दृष्टं भुक्तं घ्रातं पुनः पुनः ।

संशुष्कविरसं भूयः किं भजामि वदाशु मे ।। २७

भुक्त्वा वर्षसहस्राणि दुर्भोगपटलीमिमाम् ।

आब्रह्मस्तम्बपर्यन्तं न तृप्तिरुपजायते ।। २८

साम्राज्यं सुचिरं कृत्वा तथा भुक्त्वा वधूगणम् ।

भंक्त्वा परबलान्युच्चैः किमपूर्वमवाप्यते ।। २९

येषां विनाशनं नासीद्यैर्भुक्तं भुवनत्रयम् ।

तेऽपि तेऽप्यचिरेणैव समं भस्मपदं गताः ।। 6.2.6.३०

प्राप्तेन येन नो भूयः प्राप्तव्यमवशिष्यते ।

तत्प्राप्तौ यत्नमातिष्ठेत्कष्टयापि हि चेष्टया ।। ३१

येन कान्ताश्चिरं भुक्ता भोगास्तस्येह जन्तुभिः ।

दृष्टो न कस्यचिन्मूर्ध्नि तरुर्व्योमप्लवश्च वा ।। ३२

चिरमासु दुरन्तासु विषयारण्यराजिषु ।

इन्द्रियैर्विप्रलब्धोऽस्मि धूर्तबालैरिवार्भकः ।। ३३

अद्य त्वेते परिज्ञाता मया स्वविषयारयः ।

कष्टा इन्द्रियनामानो वञ्चयित्वा तु मां पुनः ।। ३४

संसारजङ्गले शून्ये दग्धं नरमृगं शठाः ।

आश्वास्याश्वास्य निघ्नन्ति विषयेन्द्रियलुब्धकाः ।।३५

विषमाशीविषैरेभिर्विषयेन्द्रियपन्नगैः ।

येन दग्धा न दृष्टास्ते द्वित्रा एव जगत्यपि ।। ३६

भोगभीमेभवलितां तृष्णातरलवागुराम् ।

लोभोग्रकरवालाढ्यां कोपकुन्तकुलाङ्किताम् ।। ३७

द्वन्द्वजालरथव्याप्तामहंकारानुपालिताम् ।

चेष्टातुरंगमाकीर्णां कामकोलाहलाकुलाम् ।। ३८

शरीरसीमान्तगतां दुरिन्द्रियपताकिनीम् ।

ये जेतुमुत्थितास्तात त एवेह हि सद्भटाः ।। ३९

सुसाध्यः करटोद्भेदो मत्तैरावणदन्तिनः ।

नोत्पथप्रतिपन्नानां स्वेन्द्रियाणां विनिग्रहः ।। 6.2.6.४०

पौरुषस्य महत्त्वस्य सत्त्वस्य महतः श्रियः ।

इन्द्रियाक्रमणं साधो सीमान्तो महतामपि ।। ४१

तावदुत्तमतामेति पुमानपि दिवौकसाम् ।

कृपणैरिन्द्रियैर्यावत्तृणवन्नापकृष्यते ।। ४२

जितेन्द्रिया महासत्त्वा ये त एव नरा भुवि ।

शेषानहमिमान्मन्ये मांसयन्त्रगणांश्चलान् ।। ४३

मनःसेनापतेः सेनामिमामिन्द्रियपञ्चकम् ।

जेतुं चेदस्ति मे यत्नो जयामि तदलं मुने ।। ४४

इन्द्रियोत्तमरोगाणां भोगाशावर्जनादृते ।

नौषधानि न तीर्थानि न च मन्त्राश्च शान्तये ।। ४५

नीतोऽस्मि परमं खेदमभिधावद्भिरिन्द्रियैः ।

एक एव महारण्ये तस्करैः पथिको यथा ।। ४६

पङ्कवन्त्यप्रसन्नानि महादौर्भाग्यवन्ति च ।

गन्धिशैवलतुच्छानि पल्वलानीन्द्रियाणि च ।। ४७

दुरतिक्रमणीयानि नीहारगहनानि च ।

जनितातङ्कजालानि जङ्गलानीन्द्रियाणि च ।। ४८

पङ्कजानि सरन्ध्राणि सुदुर्लक्ष्यगुणानि च ।

ग्रन्थिमन्ति जडाङ्गानि मृणालानीन्द्रियाणि च ।।४९

रूक्षाणि रत्नलुब्धानि कल्लोलवलितानि च ।

दुर्ग्रहग्राहघोराणि क्षाराम्बूनीन्द्रियाणि च ।। 6.2.6.५०

बान्धवोद्वेगदायीनि देहान्तरकराणि च ।

करुणाक्रन्दकारीणि मरणानीन्द्रियाणि च ।। ५१

अविवेकिष्वमित्राणि मित्राणि च विवेकिषु ।

गहनानन्तशून्यानि काननानीन्द्रियाणि च ।। ५२

घनास्फोटान्यसाराणि मलिनानि जडानि च ।

विद्युत्प्रकाशान्येतानि भीमाभ्राणीन्द्रियाणि च ।। ५३

क्षुद्रप्राणिगृहीतानि वर्जितानि कृतात्मभिः ।

रजस्तमोभिभूतानि स्वेन्द्रियाण्यवटानि च ।। ५४

पातनैकान्तदक्षाणि दोषाशीविषवन्ति च ।

रूक्षकण्टकलक्षाणि श्वभ्राग्राणीन्द्रियाणि च ।। ५५

आत्मंभरीण्यनार्याणि साहसैकरतानि च ।

अन्धकारविहारीणि रक्षांसि स्वेन्द्रियाणि च ।। ५६

अन्तःशून्यान्यसाराणि वक्राणि ग्रन्थिमन्ति च ।

दहनैकार्थयोग्यानि दुर्दारूणीन्द्रियाणि च ।। ५७

घनमोहप्रबन्धीनि दुष्कूपगहनानि च ।

महावकरतुच्छानि कुपुराणीन्द्रियाणि च ।। ५८

अनन्तेषु पदार्थेषु कारणानि घटादिषु ।

संभ्रमाणि सपङ्कानि चक्रकाणीन्द्रियाणि च ।। ५९

आपन्निमग्नमिममेवमकिंचनं त्वं

मामुद्धरोद्धरणशील दयोदयेन ।

ये नाम केचन जगत्सु जयन्ति सन्त-

स्तत्संगमं परमशोकहरं वदन्ति ।। 6.2.6.६०

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे उ० विद्याधरोपाख्याने वैराग्यवर्णनं नाम षष्ठः सर्गः ।। ६ ।।